## GAnAmruta

**By Smt.Shubha Rao**

[RamEshagIti - youtube link]

# रमेशगीति

जलचरतया ददौ वेदमादौ
तरुणतरणिच्छविर्यो विधात्रे ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥१॥

अधृत सुमनोमनोवल्लभो यः
कमठवपुषा महामंदराद्रिम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥२॥

जितदितिसुतो वराहो वरेण्यो
धरणिमुदधादधीरां पुरा यः ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥३॥

दितिजगजराजविध्वंससिंहं
प्रखरनखराख्यवज्रं नृसिंहम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥४॥

अनुजममराधिराजस्य बालं
सितबलिबलं त्रिविक्रांतिमंतम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥५॥

अवनिपवनानलं जामदग्न्यं
गिरिशवरदायिनं रामदेवम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥६॥

दशमुखमुखद्विजाहारिमृत्युं
दशरथसुतं पतिं भूमिजायाः ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥७॥

मथितपृथिवीभरं वासुदेवं
मधुरमधिकं प्रियं पांडवानाम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥८॥

असुरमनसां महामोहहेतुं
विशदमनसां हितं बुद्धरूपम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥९॥

कलिकलिलकालवैकल्यमूलं
कलितखलसंकटं कल्किदेवम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥१०॥

अगणितगुणं गुणापेतमेकं
विधिमुखविचिंतितं ब्रह्मसंज्ञम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥११॥

दशशततनुं तथा~प्येकरूपं
दशशततनुं तथा~नंतरूपम् ।
शरदणमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥१२॥

लिकुचकविनंदनः सन्नुपांत्ये
व्यदधदिति वै रमेशस्य गीतिम् ।
शरणदमदोषमानंदपूर्णं
शरणमनिशं रमेशं प्रपद्ये ॥१३॥